Website : www.kamakoti.org.
email : kanchimutt@gmail.com

Contact : 044-27222115
Acts : 044-27224236
Cell : 9445421115

|| Sri Chandramouleeswaraya Nama: ||
Sri Sankara Bhaghavadpadacharya Paramparagatha Moolamnaya Sarvajnapeeta
His Holiness Sri Kanchi Kamakoti Peetadhipathi

**JAGADGURU SRI SANKARACHARYA SWAMIGAL**
**Srimatam Samsthanam**
**No. 1, Salai Street, Kancheepuram - 631 502, Tamilnadu State, INDIA.**

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य – श्रीमज्जगद्गुरु श्रीमच्छङ्कर भगवत्पादाचार्याणाम् अधिष्ठाने सिंहासनाभिषिक्तानां श्रीमज्जयेन्द्र सरस्वतीसंयमीन्द्राणाम् अन्तेवासिवर्यैः श्रीमच्छङ्कर विजयेन्द्र सरस्वती श्रीपादैः श्रीमत् देन्दुकूरि वेङ्कटेश्वर पौण्डरीकयाजिभिः **प्रचिक्रमिषित** – चतुर्थाग्नि युक्त समूढ पौण्डरीक यागस्य निष्प्रत्यूह परिसमाप्तिसिद्ध्ये चिन्तित सकल **मनोरथ परिपूरिका नारायण स्मृतिः** विधीयते।

'यज्ञो हि श्रेष्ठतमं कर्म', 'वेदा हि यज्ञार्थमभिप्रवृत्ताः' इत्यार्यनिगदवचनम् , एवम् 'यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः' इति जगद्गुरु श्रीकृष्ण स्वामिनः शासनम् । अपि च इदं यज्ञकर्मानुष्ठानं लोकाभ्युदयकरं धीशुध्या निःश्रेयसकरञ्च। प्रजापति श्चतुर्मुख ब्रह्मापि प्रजापशु सृष्टये यागादिकमनुष्ठाय प्रजाः पशून् च ससर्ज इति 'प्रजापतिर्वा इदमेक ... प्रजाः पशून् असृजत' इत्यत्र प्रपञ्चितम्। अपि च सर्वं यज्ञे प्रतिष्ठितमिति यष्टॄणां यज्ञ कर्म एव परमं मोक्षसाधनमितिचेरितंनारायणोपनिषदि । यथा नाभिमाधारीकृत्य रथचक्रं परिवर्तते तथा सर्वप्राणिनाम् इहपरलोकसंचारः यज्ञाधीनः, अतः अयं यज्ञः लोकस्य नाभिस्थानीयः इत्याश्वमेधिकश्रुतिः आम्नायते । सोमयागेषु उत्तरक्रतुषु तत्तत्प्रधान क्रतूनां अग्निसंस्काररूपस्य अङ्गविशेषस्य अग्निचयनमिति नामधेयं, तत्संस्काररूपं महाग्निचयनम् अत्र अनुष्ठीयमान चतुर्थाग्नौ दीक्षादीनाम् अनन्तरम् द्वादशदिनसाध्यं भवति। चतुर्थपर्यायत्वादत्र श्येनाकारेण चीयमानानां सहस्रत्रयसंख्योपेतानाम् इष्टकानाम् परिमाणाधिक्यं वर्तते । किञ्चात्र मृन्मय्यमृन्मयीष्टकाः देवतारूपेण,वैदिकलौकिकच्छन्दोरूपेण, सामवेदोक्ततत्तत्स्तोमरूपेण, त्यविरादिशब्दोक्ततत्तत्कालरूपेण, नक्षत्र रूपेण, अग्निरूपेण, यज्ञतनुरूपेण, लोकत्रयरूपेण, अबादिरूपेण च चीयन्ते, अन्ततो गत्वा इष्टकानाम् एतेषां कामधेनुस्वरूपत्वमापादितम् । मन्त्रार्थानुस्मरणपूर्वकेष्टकोपधानेन चितानां इष्टकानाम् तत्तद्देवतादितादात्म्यं दरीदृश्यते । अपि चास्याः चितेः संवत्सर स्वरूप प्रजापति रूपत्वं वर्वर्ति। विशिष्यात्र अशेषेष्टकोपधानसमनन्तरम् चरमायामिष्टकायां कर्मोपासनाब्रह्मकाण्डेषु सर्वोत्तमत्वेन विराजमान श्रीरुद्राध्याय होमेन पृथिव्यन्तरिक्षदिविषद्भ्यः क्रूरदेवेभ्यः रुद्रेभ्यः कृत्स्नस्य जगतः उत्पन्नोत्पत्समान वैर्युपद्रवभीत्यादिकम् अपह्रियते अपि च वेदान्तार्थकरम्बित वैश्वकर्मणहोमः कर्मण्यस्मिन् अनुष्ठीयते इत्परो विशेषः।

Website : www.kamakoti.org
email : kanchimutt@gmail.com



Contact : 044-27222115
Acts : 044-27224236
Cell : 9445421115

II Sri Chandramouleeswaraya Nama: ||

Sri Sankara Bhaghavadpadacharya Paramparagatha Moolamnaya Sarvajnapeeta

His Holiness Sri Kanchi Kamakoti Peetadhipathi

# JAGADGURU SRI SANKARACHARYA SWAMIGAL

## Srimatam Samsthanam

**No. 1, Salai Street, Kancheepuram - 631 502, Tamilnadu State, INDIA.**

मारुतहोमानन्तरम् वसोर्धाराहोमेन श्रीरुद्रः शिवो भूत्वा शन्तमया तन्वा सर्वान् अनुगृह्णातीति निश्चप्रचं। ततः सर्वक्रतुसमूह रूपः समूढैकादशरात्रः पौण्डरीकः अनुष्ठीयते । अपि च तत्तत्सुत्याहस्सु तत्तत्सोमसंस्थायाः अनुष्ठानेन तत्तद्देवतायागेन च तत्ताद्यागफलं तत्तद्देवतानुग्रहप्राप्तिः कर्तृकारयितृप्रेरकानुमोदकानां, समेषां भक्तजनानां च भवतीति नास्माकं सन्देहलवलेशोऽस्ति। इदश्च यज्ञक्रतूनाम् अनुष्ठानं यद्यपि बह्वायासव्ययप्रयाससाध्यं तथापि श्री देन्दुकूरि वेङ्कट हनुमत्सोमयाजिनां पौत्राः, श्री देन्दुकूरि वेङ्कटप्प यज्ञनारायण पौण्डरीक याजिनां (तुरीयाश्रमे ज्ञानानन्द तीर्थ स्वामिनः, काश्यां प्राप्त मोक्षाः) पुत्राः श्री महेन्दुकूरि वेङ्कटेश्वर पौण्डरीक याजिनः लोकक्षेमार्थं अखण्ड गौतमी तीरस्थ पेदवाडपल्लिग्रामे पुरोहविषि देवयजने अनुतिष्ठासिष्यन्तीति महदिदं लोकानन्दास्पदं । यद्यपि एते सोमयाजिनः श्रुताध्ययनादि सर्वगुणसम्पन्नाः सन्तः इतःपूर्वमेव पौण्डरीकान्तक्रतुभिः यज्ञेशं विष्णुमयजन्त । तथापि यज्ञेशार्चने अतृप्तमनसः पुनः लोकक्षेमाय पौण्डरीकानुष्ठानं संविधित्सिष्यन्ति। ऋद्धिकामनया अनुष्ठीयमानं इदं पौण्डरीकानुष्ठानं ज्ञानानंदतीर्थ स्वामिनः शतजयंती संदर्भे अनुष्ठीयते इति अपरोविशेषः। विशिष्य एतेषां पुत्रपौत्रजामातृदौहित्राः सर्वेऽपि अधीतवेदशास्त्रत्रिकाण्डयाज्ञिकविद्याः अतः एतादृशैः ऋत्विभिः क्लृप्तो यज्ञः सकल फलाभिवर्षकः अतिवृष्ट्यनावृष्ट्यादिपरिहारकः च भवतीति आस्तिकवर्यैः सर्वैरपि विदित एव अतः भक्तजनैः सर्वैरपि यज्ञोपकारद्रव्यप्रदानपूर्वकं महाक्रतावस्मिन् समुचित भागः स्वीकार्यः । विशिष्य सर्वोत्तमेऽस्मिन् क्रतुराजे पौण्डरीके विशेषयत्नं विदधतां यागस्वामिनां समेषाम् ऋत्विजां च 'युञ्जते मनः' इति मन्त्रोक्तदिशा विषयेभ्यः मनोनिवर्तनपूर्वकम् आलस्यादिदोषरहितम् अनुष्ठानं विधातुं सामर्थ्यम् श्रीमन्महात्रिपुरसुन्दरीप्रणयी श्री चन्द्रमौळीश्वरःस्वापाङ्गवीक्षणेन आकलयतु इति, अपिचेयमानुवंशिक वैश्वानरयज्ञपरम्परा लोकहिता वर्धिषीष्ट इत्याशास्महे ।

नारायणस्मृतिः

श्री शोभकृन्नामसंवत्सर मार्गशीर्षमास - शुक्ल- अष्टमी

यात्रास्थानम्- शंकरमठः, हनुमन्मन्दिरम्, स्कन्दगिरिः, भाग्यनगरम्

शाङ्कराब्दः २५३२